## अन्तर्वत्पतिवतोर्नुक् । (३२/४८९)

प्रकृतिर्निपात्यते, नुगागमस्तु विधीयते । अन्तर्वत्पतिवतोर्नुक् [1]भवति ङीप् [2]च प्रत्ययः, स तु नकारान्तत्वादेव सिद्धः । [3]निपातन[4]सामर्थ्याच्च विशेषे वृत्ति[5]र्भवति । अन्तर्वत् पतिवत् इति गर्भभर्तृसंयोगे । [6]इह न भवति, अन्तरस्यां शालायां विद्यते[7] । पतिमती पृथिवी (म.भा.२. २१३) । अन्तर्वत् इति मतुब् निपात्यते, वत्वं सिद्धम्[8] । पतिवत् इति वत्वं निपात्यते, मतुप् सिद्धः[9] । अन्तर्वत्नी गर्भिणी । पतिवत्नी [10]जीवपतिः ।

अन्तर्वत्पतिवतोस्तु मतुब्वत्वे निपातनात् ।
गर्भिण्यां [11]जीवपत्यां च वा छन्दसि तु नुग्विधिः ॥ (म. भा. २. २१४)

सान्तर्वत्नी [12]देवानुपैत् (म. भा. २. २१४) । सान्तर्वती [13]देवानुपैत् (म. भा. २. २१४) । पतिवत्नी तरुणवत्सा (म. भा. २. २१४) । पतिवती तरुणवत्सा (म. भा. २.२१४) ॥

## पत्युर्नो यज्ञसंयोगे । (३३/४९०)

[14]पतिशब्दस्य नकारादेशः स्त्रियां विधीयते, ङीप् प्रत्ययस्तु नकारान्तत्वादेव सिद्धः यज्ञसंयोगे । यज्ञेन संयोगः यज्ञसंयोगः[15] । तत्साधनत्वात् फलग्रहीतृत्वात् [16]वा यजमानस्य पत्नी । पत्नि वाचं [17]यच्छ । यज्ञसंयोगे इति किम् ? ग्रामस्य पतिरियं ब्राह्मणी । कथं वृषलस्य पत्नी ? [18]उपमानाद् भविष्यति ॥

## विभाषा सपूर्वस्य । (३४/४९१)

पत्युर्नः इति वर्तते । पतिशब्दान्तस्य प्रातिपदिकस्य सपूर्वस्यानुपसर्जनस्य स्त्रियां विभाषा नकारादेशो भवति, ङीप् [19]तु लभ्यते एव । वृद्धपत्नी, वृद्धपतिः । स्थूलपत्नी, स्थूलपतिः (म.भा. २.२१४) । अप्राप्तविभाषेयम्–यज्ञसंयोगत्वात् । सपूर्वस्य इति किम् ? पतिरियं ब्राह्मणी [20]ग्रामस्य ॥

## नित्यं सपत्न्यादिषु । (३५/४९२)

सपत्न्यादिषु नित्यं पत्युर्नकारादेशो भवति, ङीप् [21]तु लभ्यते एव । पूर्वेण विकल्पे प्राप्ते वचनम् । नित्यग्रहणं विस्पष्टार्थम् । समानः पतिरस्याः [22]सपत्नी । [23]एकपत्नी । [24]समानादिष्विति वक्तव्ये [25]समानस्य सभावार्थं वचनम्[26] ।

समान । एक । वीर । पिण्ड[27] । भ्रातृ[28] । पुत्र ।
[३४४] दासाच्छन्दसि[29] ॥

---

1. विधीयते ड. 2. च नास्ति फ. 3. निपातनार्थात् अर्थसामर्थ्यात् ड. 4. सामर्थ्याद्धि फ. 5. भविष्यति क. 6. इह मा भूत् इ. 7. अन्तर्वती शाला इत्यधिकम् ड. ह. 8–9. एव इत्यधिकम् ड. 10. जीवत्पतिः ह. 11. जीवत्पत्न्यां क. ब. इ. ह. 12–13. उपैति ब. ह, सा अन्तर्वती देवान् पुनः परैत् (काठ. 8. 10. 1). 14. पतिशब्दो नकारान्तादेशः ब. क. इ. 15. तस्मिन् इत्यधिकम् इ. 16. च ब. फ. 17. प्रयच्छ ग. 18. उपचारात् ब. 19. च क. ड. 20. अस्य क. ड. 21. तु नास्ति फ. 22. सा इत्यधिकम् ह. 23. नास्ति फ. 24. वाक्यमिदं नास्ति इ. 25. समानस्य नास्ति ह. 26. सपत्न्यादिषु इति इत्यधिकम् क. ड. 27. श्वा इत्यधिकम् ब. 28. भद्र इत्यधिकम् क. ड. 29. दासः पतिः अस्याः दासपत्नी इत्यधिकम् इ, दासपत्नीरहिगोपा अतिष्ठन् इत्यधिकम् क.ड, छन्दसि इत्येव दासपतिः इत्यधिकम् ड, दासपत्नीरधूनुतम् (ऋ. 3.12.6) इत्यधिकम् फ.